# Shri Radha Ashtakam

# શ્રીરાધાષ્ટકમ્

## Document Information

Text title : rAdhAShTakam

File name : rAdhAShTakam.itx

Category : devii, krishna, rUpagosvAmin, stavamAlA, aShTaka, radha, devii, devI

Location : doc_devii

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA, sarasa stotrasangrahaH (Lucknow, 1909)

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

Shri Radha Ashtakam

# શ્રીરાધાષ્ટકમ્

ૐ દિશિદિશિરચયન્તીં સઞ્ચયન્નેત્રલક્ષ્મીં
    વિલસિતખુરલીભિઃ ખઞ્જરીટસ્ય ખેલામ્ ।
હૃદયમધુપમલ્લીં વલ્લવાધીશસૂનો-
    રખિલગુણગભીરાં રાધિકામર્ચયામિ ॥ ૧॥

પિતુરિહ વૃષભાનો રત્નવાયપ્રશસ્તિં
    જગતિ કિલ સયસ્તે સુષ્ઠુ વિસ્તારયન્તીમ્ ।
વ્રજનૃપતિકુમારં ખેલયન્તીં સખીભિઃ
    સુરભિનિ નિજકુણ્ડે રાધિકામર્ચયામિ ॥ ૨॥

શરદુપચિતરાકાકૌમુદીનાથકીર્ત્તિ-
    પ્રકરદમનદીક્ષાદક્ષિણસ્મેરવક્ત્રામ્ ।
નટયદભિદપાઙ્ગોત્તુઙ્ગિતાનં ગરઙ્ગાં
    વલિતરુચિરરઙ્ગાં રાધિકામર્ચયામિ ॥ ૩॥

વિવિધકુસુમવૃન્દોત્ફુલ્લધમ્મિલ્લધાટી-
    વિઘટિતમદઘૂર્ણત્કેકિપિચ્છપ્રશસ્તિમ્ ।
મધુરિપુમુખબિમ્બોદ્ગીર્ણતામ્બૂલરાગ-
    સ્ફુરદમલકપોલાં રાધિકામર્ચયામિ ॥ ૪॥

નલિનવદમલાન્તઃસ્નેહસિક્તાં તરઙ્ગા-
    મખિલવિધિવિશાખાસખ્યવિખ્યાતશીલામ્ ।
સ્ફુરદઘભિદનર્ઘપ્રેમમાણિક્યપેટીં
    ધૃતમધુરવિનોદાં રાધિકામર્ચયામિ ॥ ૫॥

અતુલમહસિવૃન્દારણ્યરાજ્યેભિષિક્તાં
    નિખિલસમયભર્તુઃ કાર્તિકસ્યાધિદેવીમ્ ।
અપરિમિતમુકુન્દપ્રેયસીવૃન્દમુખ્યાં
    જગદઘહરકીર્તિં રાધિકામર્ચયામિ ॥ ૬॥

હરિપદનખકોટીપૃષ્ઠપર્યન્તસીમા-
    તટમપિ કલયન્તીં પ્રાણકોટેરભીષ્ટમ્ ।
પ્રમુદિતમદિરાક્ષીવૃન્દવૈદગ્ધ્યદીક્ષા-
    ગુરુમપિ ગુરુકીર્તિં રાધિકામર્ચયામિ ॥ ૭॥

અમલકનકપટ્ટીદૃષ્ટકાશ્મીરગૌરીં
    મધુરિમલહરીભિઃ સમ્પરીતાં કિશોરીમ્ ।
હરિભુજપરિરબ્ધ્વાં લબ્ધરોમાઞ્ચપાલીં
    સ્ફુરદરુણદુકૂલાં રાધિકામર્ચયામિ ॥ ૮॥

તદમલમધુરિમ્ણાં કામમાધારરૂપં
    પરિપઠતિ વરિષ્ઠં સુષ્ઠુ રાધાષ્ટકં યઃ ।
અહિમકિરણપુત્રીકૂલકલ્યાણચન્દ્રઃ
    સ્ફુટમખિલમભીષ્ટં તસ્ય તુષ્ટસ્તનોતિ ॥ ૯॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીરાધાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

---

*Shri Radha Ashtakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*